अग्निरूपं स्ववीजं वह्निमुखे क्षिप्तं। तेन अग्निना कृत्तिकासु क्षिप्तं। ताश्च दैवागतगर्भरक्षार्थं शरवनं प्रविश्य प्रसूताः। तेन अग्निभूरिति कार्त्तिकेयः। जले क्ली। इति वेदपुराणे॥ यथाह मनुः,—

"अग्नौ दत्ताहुतिः सम्यगादित्यमुपतिष्ठते।
आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः"॥

अग्निभूतिः, पुं, (अग्नि+भू+क्ति।) बौद्धभेदः। सच शेषजैनाचार्य्यशिष्यः। इति हेमचन्द्रः॥

अग्निमणिः, पुं, सूर्य्यकान्तमणिः। इति जटाधरः॥

अग्निमन्थः, पुं, (अग्निं मथ्नाति इति। मन्थ विलोड़ने। कर्म्मणि अण्।) गणिकारिकावृक्षः। इत्यमरः॥ (यथा वैद्यके,—

"अग्निमन्थः श्वयथुहृद् वीर्य्योष्णः कफवातहृत्।
पाण्डुनुत् कटुकस्तिक्तस्तुवरो मधुरोऽग्निदः"॥

अग्निमन्थकुसुमशाकन्तु—

"अग्निमन्थभवबालसुनीता
सम्यगात्तमुदके सुसाधिता।
तक्रतप्तघृतयुक्तपाचिता
हिङ्गुना जनितवासवासिता"॥

अपिच—

"अग्निमन्थोऽथ हृद्यश्च त्रिदोषशमनः सरः। ।
आध्मानच्छर्द्दिहा शोथचक्षूरोगविषापहः"॥)

अग्निमारुतिः, पुं, (अग्नौ जठराग्निविषये मारुतिः हनूमान् इव। तस्य जठराग्नौ वातापिप्रभृतयो राक्षसाः भस्मीभूता आसन्। इत्यसौ अग्निमारुतिरुच्यते) अगस्त्यमुनिः। इति हेमचन्द्रः॥

अग्निमुखः, पुं, (अग्निः मुखं यस्य, बहुव्रीहिः।) देवता। ब्राह्मणः। इति मेदिनी॥ चित्रकवृक्षः। भल्लातकः। इति विश्वः॥ (क्ली। अग्नेः पञ्चसु मुखेषु।)

अग्निमुखी, स्त्री, (अग्निरिव मुखं यस्याः। बहुव्रीहिः।) भल्लातकी (भेला)। इत्यमरः॥ लाङ्गलिकी। इति राजनिर्घण्टः॥

अग्निरक्षणं, क्ली, (अग्नेः रक्षणम्। षष्ठीतत्पुरुषः।) अग्न्याधानं। अग्निहोत्रं। इति हेमचन्द्रः॥

अग्निरजाः, [स्] पुं, (अग्नेः रजः स्फुलिङ्ग इव।) इन्द्रगोपाख्यकीटः। इति हेमचन्द्रः॥ (क्ली— अग्निवीर्य्यं। स्वर्णं)।

अग्निरुहा, स्त्री, मांसरोहिणी। इति राजनिर्घण्टः॥

अग्निवर्द्धकः, त्रि, (अग्निं जठरानलं वर्द्धयति इति) अग्नि+वृध्+णवुल्।) अग्निवृद्धिकारकौषधादिः। आग्नेयः। इति वैद्यकं॥

अग्निवल्लभः, पुं, (अग्नेः वल्लभः उद्दीपकत्वात् प्रियः।) सालवृक्षः। रालः। इति राजनिर्घण्टः॥

अग्निवाहः, पुं, (अग्नेः वाहः।) धूमः। इति त्रिकाण्डशेषः॥ (छागः)।

अग्निबाहुः, पुं, (अग्नेः बाहुरिव।) धूमः। इति जटाधरः॥ (प्रियव्रतपुत्त्रः। स्वायम्भुवमनुपुत्त्रः।)

अग्निवित्, पुं, (अग्निं वेत्ति इति विदः क्विप्।) अग्निचित्। अग्निहोत्री। इति हेमचन्द्रः॥ (अग्निसंस्कारज्ञः।)

अग्निवीजं, क्ली, (अग्निः वीजं उत्पत्तिस्थानं यस्य तत्। अग्नेः स्वर्णस्य उत्पत्तिं यथाह मनुः,—

"अपामग्नेश्च संयोगात् हेमं रूप्यञ्च निर्बभौ।
तस्मात् तयोः स्वयोन्येव निर्णेको गुणवत्तरः"॥)

स्वर्णं। इति त्रिकाण्डशेषः॥

अग्निवीर्य्यं, क्ली, (अग्नेः वीर्य्यं सार इव।) स्वर्णं। इति राजनिर्घण्टः॥ (त्रि, अग्नितुल्यद्रव्ये)।

अग्निशिखं, क्ली, (अग्नेरिव शिखा केशरः अस्य।) स्वर्णं। इति राजनिर्घण्टः॥ कुङ्कुमं। कुसुम्भपुष्पं। इति मेदिनी॥ (लाङ्गलिवृक्षः)।

अग्निशिखः, पुं, (अग्नेरिव शिखा रक्तवर्णः केशरः अस्य।) कुसुम्भवृक्षः। कुङ्कुमं। दीपः। वाणः। इति शब्दरत्नावली॥

अग्निशिखा, स्त्री, (अग्नेरिव शिखा केशरः अस्याः।) लाङ्गलिकीवृक्षः। विषलाङ्गला इति भाषा। वृक्षविशेषः। तस्य पर्य्यायः। विशल्या १ अनन्ता २ फलिनी ३ शक्रपुष्पी ४। इत्यमरः॥ (अग्नेः शिखा।) ज्वाला। आगुनेर शिष इति भाषा॥

अग्निशेखरं, क्ली, (अग्नेरिव शेखरं केशरः अस्य।) कुङ्कुमं। इति राजनिर्घण्टः॥

अग्निष्टोमः, [पुं, (अग्नीनां स्तोमः। अग्नेः स्तुत्स्तोमसोमा इति षः।) यज्ञविशेषः। इति शब्दरत्नावली॥ तस्य विधिः। ज्योतिष्टोमेन स्वर्गकामो यजेतेति वाक्यविहितज्योतिष्टोमनामकयागविशेषस्य गुणविकारोऽग्निष्टोमो नाम। तस्य कालो वसन्तः। तत्राधिकारी अधीतवेद आहिताग्निश्च। द्रव्यं सोमः। देवता इन्द्रवाय्वादयः। ऋत्विजः षोड़शः। तेषाञ्च चत्वारो गणाः। होतृगणः १ अध्वर्य्युगणः २ ब्रह्मगणः ३ उद्गातृगणः ४। एकैकस्य गणस्य चत्वारश्चत्वारः। तत्र होतृगणे होता १ प्रशास्ता २ अच्छावाकः ३ ग्रावस्तोता ४। अध्वर्य्युगणे अध्वर्य्युः १ प्रतिप्रस्थाता २ नेष्टा ३ उन्नेता ४। ब्रह्मगणे ब्रह्मा १ ब्राह्मणाच्छंशी २ अग्नीत् ३ पोता ४। उद्गातृगणे उद्गाता १ प्रस्तोता २ प्रतिहर्त्ता ३ सुब्रह्मण्यः ४। स च पञ्चाहसाध्यः। प्रथमदिने दीक्षा दीक्षणीयादितदङ्गानुष्ठानं। तत्र द्वितीयदिवसे प्रायणीययागः सोमलताक्रयणं। ततो द्वितीयतृतीयचतुर्थदिवसेषु प्रातःकाले सायंकाले च प्रवर्ग्योपसन्नामकयागानुष्ठानं। चतुर्थदिवसे प्रवर्ग्योद्वासनानन्तरं अग्नीषोमीयपश्वनुष्ठानं। तत्र यस्य यजमानस्य गृहे पितृपितामहप्रपितामहानां मध्ये केनापि वेदो नाधीतोऽग्निष्टोमो वा न कृतः स दुर्ब्राह्मणो भवति। तस्य दौर्ब्राह्मण्यपरिहारायाश्विनपशुः कर्त्तव्यः। यस्य यजमानस्य पितृपितामहप्रपितामहानां मध्ये केनापि सोमपानं न कृतं स्यात् तस्य सोमपानविच्छेददोषपरिहारार्थमैन्द्राग्नपश्वनुष्ठानं कर्त्तव्यं। इत्थं त्रयाणां पशूनां युगपदालम्भपक्षे एकस्मिन्नेव यूपे त्रयाणां पशूनां बन्धनं। इत्थं पशुत्रयानुष्ठानं चतुर्थदिवसे तस्मिन्नेव दिने वा तृतीयभागे उत्थाय प्रयोगारम्भः कार्य्यः। तत्र पात्रासादनं। पात्राणि च ग्रहाश्चमसाः स्थाल्यश्चेति। तत्र ग्रहपात्राणि वितस्तिमात्राणि उलूखलाकाराणि। ऊर्द्ध्वपात्राणि चमसपात्राणि तावत्परिमितान्येव तिर्य्यगाकृतीनि कोणचतुष्टयविशिष्टानि धारणार्थदण्डयुक्तानि। स्थाल्यो मार्त्तिक्यः। तत आरभ्य सोमलताकण्डनेन सोमरसं निष्कास्य निष्कास्य ग्रहैश्चमसैश्च होमः कर्त्तव्यः। तत्र सूर्य्योदयानन्तरं आग्नेयपशुयागः कर्त्तव्यः। एवमुक्थ्यपर्य्यायान्ते कृते प्रातःसवनसमाप्तिः। ततो मध्यन्दिनसवनं। तत्र दक्षिणादानं। दक्षिणा च द्वादशोत्तरशतं गावः। ततस्तृतीयसवनं। इत्थं प्रातःसवनमाध्यन्दिनसवनतृतीयसवनरूपसवनत्रयात्मकः अग्निष्टोमः प्रधानयागः। इतरेऽङ्गयागाः। तृतीयसवनसमाप्त्युत्तरमवभृथयागः। उदके वरुणदेवताकपुरोडाशहोमः। तदनन्तरमनुबन्ध्या पशुयागः। तत्र गौः पशुः। तस्य कलिनिषिद्धत्वात् तस्य च नित्यत्वात् तत् स्थाने आमीक्षायागः। तत उदयनीया तत उदवसानीया। सा च पञ्चमदिवसे यावद्रात्रि कर्त्तव्या। तत्समाप्तावग्निष्टोमयागसमाप्तिः। इत्यग्निष्टोमयागीयपदार्थकलासूची॥

अग्निष्ठः, पुं, (अग्नौ तिष्ठतीति। अग्नि+स्था+कः)। लौहमयतण्डुलादिभर्जनपात्रं। इति त्रिकाण्डशेषः॥ (कड़ा इति भाषा)।

अग्निसखः, पुं, (अग्नेः सखा इति समासे राजाहःसखिभ्यष्टच् इति समासान्तष्टच्।) वायुः। वायुसखोऽग्निरिति दर्शनात्॥

अग्निसन्दीपनं, त्रि, (अग्नेः सन्दीपनम्। सम्+दीप्+ल्युट्।) वह्निवर्द्धकौषधादि। यथा,—

"एला त्वङ्नागपुष्पाणां मात्रोत्तरविवर्द्धिता।
मरिचं पिप्पली शुण्ठी चतुःपञ्चषडुत्तरा॥
द्रव्याण्येतानि यावन्ति तावती सितशर्करा।
चूर्णमेतत् प्रयोक्तव्यमग्निसन्दीपनं परं"॥

इति भावप्रकाशः॥

अपि च।

"अग्निसन्दीपनं हृद्यं लवणार्द्रकभक्षणं"।

इति राजवल्लभः॥

अग्निसम्भवः, पुं, (अग्निः सम्भवो यस्य सः। अग्नि+सम्+भू+अप्।) अरण्यकुसुम्भः। इति राजनिर्घण्टः॥ (कार्त्तिकेयः। त्रि। अग्निसमुत्पन्नः।)

अग्निसहायः, पुं, (अग्नेः जठरानलस्य सहायः उद्दीपकः। कपोतमांसस्य अग्निवर्द्धकत्वात्।) वनकपोतः। इति राजनिर्घण्टः॥ (अग्नेः सहायः बन्धुः। वायुः।)

अग्निसारं, क्ली, (अग्नेरिव सारः बलं यस्य।) रसाञ्जनं। इति राजनिर्घण्टः॥

अग्निस्तम्भनं, क्ली, (अग्नेः स्तम्भनम्। षष्ठीतत्पुरुषः।) मन्त्रौषधिद्वारा अग्नेर्दाहिकाशक्तिनिवारणं। तद्यथा,—

"मालूरस्य वसां गृह्य जलौकां तत्र पेषयेत्।